# विश्ववाणी

सर्वजित्–कार्तिक–शुक्ल–द्वादशी

नवम्बर् १०, २००८


## कथाश्रावणम्

एतेषु दिनेषु अमेरिकावासिभ्यः अद्यतनबालकेभ्यः संस्कृतपाठनाय बहुविधोपायाः चिन्त्यमानाः सन्ति । संस्कृतेतरभाषया तेषां व्यवहारे सति, तेषां कृते संस्कृतभाषाशिक्षणं सुलभं सफलं च भवितुं कीदृशानि रुचिवर्धकानि उपकरणानि रचनीयानि इति विशेषविचारः चिन्त्यमानः अस्ति । बहुभिः जनैः अभिव्यक्तं यत् चतुष्पञ्चवर्षीयबालकेभ्यः विविधवर्णचित्रयुक्तानि आकर्षकसंस्कृतकथापुस्तकानि रच्यन्ते चेत्, संस्कृतवातावरणं विनापि सुलभतया बालकान् संस्कृतं पाठयितुं शक्यते इति ।

परन्तु प्रश्नः अस्ति यत् पठनम् अजानद्भ्यः चतुर्वर्षीयबालकेभ्यः चित्रसहितकथापुस्तकानि किमर्थमिति । जनानाम् अभिप्रायः अस्ति यत् एतादृश–सचित्रकथापुस्तकानां द्वारा बालकानां भाषाकौशलं पठनरुचिश्च वर्धेते इति । विविधचित्रैः आकृष्टाः बालकाः कथापठनं श्रुत्वा, नूतनपदपरिचयं, वाक्यरचनसामर्थ्यं, पठने रुचिं च प्राप्नुवन्तीति जनानां विश्वासः अस्ति । अमेरिकादेशस्य प्रसिद्धबालकथापुस्तकस्य एकस्य मुख्यकथापात्रं “clifford” इति नाम्ना प्रसिद्धं रक्तवर्णीयं शुनकं, तत्सदृशानि अन्यकथापात्राणि च अमेरिकानिवासिनः सर्वे सम्यक् स्मरेयुः । “मम पुत्रस्य ज्ञानवर्धनाय, भाषाकौशलाय च महत्त्वपूर्णं कार्यमेकं कुर्वन्नस्मि” इति विचिन्तयन्तः जनाः बालानां कृते तादृशपुस्तकेभ्यः कथाः उच्चैः पठन्ति । लघुबालकाः अपि पुस्तकेषु विद्यमानानां चित्राणां साहाय्येन तत्रत्यवस्तूनां नामानि अवगम्य पदज्ञानवर्धनं, भाषाज्ञानवर्धनं च प्रदर्शयन्ति । गच्छता कालेन सर्वकारेणापि एषा उक्तिः सर्वत्र प्रसारिता “भवतां बालकेभ्यः कथापठनं कुर्वन्तु” इति । तेन प्रभाविताः अत्रत्य जनाः चिन्तयन्ति यत् संस्कृते अपि तादृशानि आकर्षकचित्रसहितकथापुस्तकानि रचितानि चेत् अस्माकं बालकाः यथा आङ्ग्लभाषां पठन्ति तथा संस्कृतमपि पठेयुः इति । अतः तादृशपुस्तकानां निर्माणं करणीयम् एव । इदानीं तस्य अभावात् बालकानां कृते संस्कृतपाठनम् अधिकश्रमयुक्तम् अस्ति।



चित्रम् – graphics-folio.com

यदि अमेरिकादेशं विहाय अन्यदेशेषु बालकेभ्यः कथापठनसम्प्रदायः परिशील्यते, तर्हि सहसा ज्ञायते यत् सर्वत्र लघुबालकेभ्यः कथापठनपद्धतिः नास्तीति । पाश्चिमात्येतरदेशेषु वर्णचित्रसहितकथापुस्तकानि विरलानि एव । तादृशपुस्तकानि वर्तन्ते चेदपि, केवलम् आङ्ग्लभाषीयानि एव, न तु अन्यभाषीयानि पुस्तकानि । तर्हि तेषु देशेषु कस्याश्चित् भाषायाः कौशलं कथं लभ्यते? पुस्तकपठने रुचिः कथम् उत्पद्यते?

तादृशस्थलेषु कथाश्रावणं भवति । मातापितरः, इतरगृहसदस्याः वा प्रसिद्ध–पौराणिक–ऐतिहासिककथाः, स्वरचित–काल्पनिककथाः च श्रावयन्ति । कथाश्रवणे कौतूहलं प्रदर्शयन्तः बालकाः अनेकघण्टाः यावत् उपविश्य कथाः शृण्वन्ति । कथाकथकः अपि साभिनयं कथायाः अर्थं बोधयति । अनेन प्रकारेण कथाश्रावणद्वारा बालकानां भाषाज्ञानं वर्धते ।

यद्यपि अस्मिन् क्षेत्रे अल्पमेव संशोधनं कृतं, तथापि ज्ञातं यत् एतेन प्रकारद्वयेनापि भाषासामर्थ्यं वर्धते इति । स्थूलदृष्ट्या द्वयोः पद्धत्योः परिणामाः प्रायः समानाः एव । कथाश्रावणानन्तरं, कथापठनानन्तरं वा बालकानां वाक्यानि दीर्घानि जातानि, वचनं धारावाहीभूतं,

## अस्मिन् अङ्के


| | |
|---|---|
| कथाश्रावणम्<br>सम्पादकीयम् | १ |
| प्रहेलिका | २ |
| पदबन्धः | २ |
| शृङ्गेरी–शारदापीठम्<br>ज्योत्स्ना कलवार् | ३ |
| भारतस्य प्रतिनिधिः विवेकानन्दः<br>हरि चन्दन् मन्त्रिप्रगड | ४ |
| श्रीपद्मावतीरमणामृतम्<br>कृष्णः जगन्नाथः | ५ |
| पुस्तकपरिचयः | ६ |
| सुभाषितम् | ६ |
| कोऽस्ति सर्वोत्तमः भारतीयः?<br>राज् कोठारु | ७ |
| परमाणु शक्तिसम्मतिः<br>नरेशः कुन्तूरु | ८ |
| मुद्रिकारहस्यम् | ९ |

शब्दसङ्ग्रहः प्रवृद्धः च । परन्तु कथाश्रवणं कृतवन्तः बालकाः साहाय्यं विना एव श्रुतां कथां सुलभतया अनूक्तवन्तः । कथापठनं श्रुतवन्तः बालकास्तु चित्राणि दृष्ट्वा एव कथां पुनर्वक्तुं शक्तवन्तः । येभ्यः कथा श्राविता, ते संपूर्णतया कथाम् अवगम्य तस्यां कथायां श्रुतान् शब्दानुपयुज्य वाक्यानि अपि रचितवन्तः । येभ्यः कथा पठिता ते कदाचित् कथायाम् उपयुक्तान् शब्दान् विस्मृत्य, केवलं तेषां दृष्टिविवरणं कृतवन्तः । कथाश्रावणेन बालकानां जागरितश्रवणकौशलमपि (attentative listening skills) वर्धते इति संशोधनेन ज्ञातम् । परन्तु कथापठितॄणां, कथाकथकानां च अनुभवैः ज्ञातं यत् कथाकथनश्रोतॄणां बालकानां मुखेषु यावती एकाग्रचित्तता दृश्यते, तावती एकाग्रचित्तता कथापठनश्रोतॄणां बालकानां मुखेषु न दृश्यते इति । अतः यद्यपि केषुचित् अंशेषु कथापठनं, कथश्रावणं, द्वे अपि समाने दृश्येते, तथापि द्वयोः मध्ये अधिकलाभदायकं कथाश्रावणमेवेति परिगण्यते ।

तर्हि संस्कृतपाठनाय वर्णमय–आकर्षकचित्रसहितानि कथापुस्तकानि किमर्थम् आवश्यकानि? मातापितॄणां कृते कथापठनं सौकर्ययुक्तं भवति । अल्पेन परिश्रमेण, स्वल्पेन ज्ञानेन एव ते कथां पठितुं शक्नुवन्ति । संस्कृतशिक्षणक्षेत्रे सचित्रकथापुस्तकानाम् अवश्यकतायाः कारणम् एतदेव । कथाश्रावणं सुलभकार्यं न । प्रत्येकेन संभाषणसामर्थ्यं, भाषणे निर्गलता च प्राप्ते चेदेव तेन कृतं कथाश्रावणं प्रभावयुक्तं भवति । कथाश्रावणसामर्थ्यं प्राप्तुं मातापितृभिः भाषाध्ययनं करणीयं, संभाषणाभ्यासः करणीयः च । परन्तु यः कोऽपि देवनागरीलिपिज्ञः केवलं कथापुस्तकस्य साहाय्येन बालकेभ्यः कथाः पठितुं शक्नोति ।

प्रौढाः गृहसदस्याः यदि किञ्चित् संस्कृतसंभाषणाभ्यासं कुर्वन्ति, तर्हि सुलभतया गृहेषु विद्यमानानां बालकानां कृते कथाः वक्तुं शक्नुवन्ति । तेन बालानां संस्कृते कौतूहलं, प्रीतिः, आसक्तिः च सर्वं सहजतया वर्धेत ।

रचयेम संस्कृतभुवनम्

सम्पादिका
सौम्या जोयिसा

# प्रहेलिका

अपदो दूरगामी च साक्षरो न तु पण्डितः ।
अमुखो स्फुटवक्ता च यो जानाति स पण्डितः ॥

पदच्छेदः – अपदः दूरगामी च, साक्षरः न तु पण्डितः,
अमुखः स्फुटवक्ता च । यः जानाति सः पण्डितः ।

एतस्य पादाः न सन्ति परन्तु दूरं गच्छति । एषः साक्षरः अस्ति परन्तु पण्डितः न । पुनश्च एतस्य मुखं नास्ति परन्तु स्पष्टतया वदति । कः एषः ? यः एतस्याः प्रहेलिकायाः उत्तरं जानाति सः पण्डितः भवितुम् अर्हति ।

उत्तरं – पत्रम् ।

# पदबन्धः - ४

## वामतः दक्षिणम्

१) धीरस्य भावः (३)
३) अतिशीतलोऽपि तुष्यति एषः (३)
४) प्रत्येकस्मिन् भाति एषा (३)
६) वायुना विपर्यस्तः सरागः पुष्परेणुः (३)
८) समीचीनः वायुः (३)
९) विष्णोः सूकररूपम् (३)

## उपरिष्टात् अधः

१) दुष्यन्तस्य अङ्गुलीयकं प्राप्तवान् एषः (३)
२) विपर्यस्तः सन्नपि प्रकृष्टं गायति एषः (३)
३) त्वरया गच्छति अयम् अश्वः (३)
५) सर्वं प्रकाशयति एषः (३)
७) विना विसर्गं विकसितं नवपुष्पम् (३)
८) युद्धाय सज्जीकरणं सत् न इति आह (३)




## पदबन्धः -३ उत्तरम्




पदबन्धस्य साधु उत्तरं डिसेम्बर् मासान्त्यात् पूर्वं यैः प्रेष्यते तेषां नामानि अग्रिमाङ्के प्रकाशिष्यन्ते । उत्तरं vishvavani@speaksanskrit.org प्रति प्रेष्यताम् ।

# अमेरिका-देशस्य शृङ्गेरी-शारदापीठम्



चित्रम् – www.svbf.org

सहस्राधिकवर्षपूर्वं भारते सर्वश्रेष्ठेन श्री–आदि–शङ्कराचार्येण स्थापयितस्य दक्षिणाम्नाय–श्रीशृङ्गेरीशारदापीठस्य विषये वयं सर्वे जानीमः । एतस्मिन् संवत्सरे अमेरिकादेशे श्रीशृङ्गेरीशारदापीठस्य भारतात् बहिः प्रथमकेन्द्रम् उद्घाटितम् अभवत् । श्रीश्रीश्रीभारतीतीर्थशृङ्गेरीशङ्कराचार्याः एतस्मै केन्द्राय अनुज्ञाम् आशीर्वादं च दत्तवन्तः । स्ट्रौड्स्बर्ग्नगरे, पोकोनो गिरौ, पेन्सिल्वेन्या प्रदेशे, श्रीशारदापरमेश्वर्याः देवालयस्य कुम्भाभिषेकः जुलै मासस्य १४ दिनाङ्के आयोजितम् आसीत् । जुलै मासस्य १२ दिनाङ्कतः जुलै मासस्य २७ दिनाङ्कपर्यन्तं स्ट्रौड्स्बर्ग्देवालये कुम्भाभिषेकमहोत्सवः अचलत् । विशालदेवालयः ३७ प्रहलमितायां भूम्यां निर्मितः अस्ति । देवालये श्रीशारदापरमेश्वर्याः सुन्दरमूर्तिः, श्री–आदिशङ्कराचार्यभगवत्पादस्य मङ्गलमूर्तिः, श्रीचन्द्रमौलीश्वरस्य शोभनमूर्तिः च सन्ति । गणेशस्य, कृष्णस्य, आञ्जनेयस्य, सुब्रह्मण्यस्य, नवग्रहाणां च शुभमूर्तयः अपि सन्ति ।

पञ्चदशवर्षेभ्यः अमेरिकादेशे प्रतिसंवत्सरं कुत्रचित् देवालयस्य शुभारम्भः भवति इति ज्ञायते । किन्तु स्ट्रौड्स्बर्ग् श्रीशारदापरमेश्वर्याः देवालयस्य कुम्भाभिषेकमहोत्सवः अतिश्रेष्ठविरलरीत्या प्राचलत् । भारतात् १७५ पण्डिताः एतत्कुम्भाभिषेकमहोत्सवकार्यक्रमार्थम् आगतवन्तः । अपि च अमेरिकादेशस्य अन्यहिन्दुदेवालयेभ्यः ५० पण्डिताः भागं स्वीकृतवन्तः । अमेरिकादेशे शृङ्गेरीविद्याभारतीसंस्थायाः प्रमुखेन श्रीयज्ञसुब्रह्मण्यमहोदयेन भारते श्रीशृङ्गेरीशारदापीठस्य प्रवर्तकेन श्रीगौरीशङ्करमहोदयेन च अन्येषां साहाय्यं स्वीकृत्य कार्यक्रमः आयोजितः आसीत् । जुलै मासस्य १४ तमे दिनाङ्के प्रातःकाले गुरुवन्दनेन, गणपतिपूजया शुभकार्यम् आरब्धम् अभवत् । अनन्तरं प्रतिष्ठापना, अष्टबन्धनं, प्राणप्रतिष्ठा, जीववाहनम् इत्यादयः विधयः शृङ्गेरी परम्परानुसारम् अचलन् । शिखरकुम्भाभिषेकशुभमुहूर्तसमये राजगोपुरस्य उपरि उदग्रयानात् पुष्पदलवृष्टिः अपतत् । तस्मिन् सायङ्काले एव स्वर्णरथोत्सवे मङ्गलश्रेण्यर्थं श्रीशारदापरमेश्वरी उपस्थिता आसीत् । भक्ताः सुनादस्वरं श्रुत्वा भजनानि गायन्तः अत्युत्साहेन स्वर्णरथोत्सवकार्यक्रमे भागम् अवहन् । कुम्भाभिषेकदिनानन्तरम् अतिरुद्रमहायज्ञः शतचण्डीयज्ञः कोटिकुङ्कुमार्चनं चतुर्वेदपारायणं च चतुर्दशदिनपर्यन्तं श्रीशारदापरमेश्वर्याः नूतने देवालये सफलं प्राचलत् । अतिरुद्रमहायज्ञे १२१ ऋत्विजः रुद्रप्रश्नम् ११ वारम् ११ दिनेभ्यः उद्गायन्ति स्म, आहत्य १४६४१ वारम् । अनन्तरं रुद्रहोमः ११ पण्डितैः ११ दिनानि यावत् कृतः । एतस्मिन्नेव समये रुद्रशिवाय पूजा पञ्चपण्डितैः क्रियमाणा आसीत् । आहत्य, अतिरुद्रमहायज्ञार्थं १३७ ऋत्विजः भागं स्वीकृतवन्तः । शतचण्डीयज्ञे कोटिकुङ्कुमार्चने चतुर्वेदपारायणे च भारतात् अनेके पण्डिताः भागं गृहीतवन्तः । भगवद्गीताश्लोकस्पर्धा अपि आयोजिता आसीत् । तथा च एकस्मिन् दिने भक्ताः सम्पूर्णभगवद्गीतायाः पारायणं कृतवन्तः ।

इदानीम् अपि भक्ताः पृच्छन्ति “ईदृशः कुम्भाभिषेकमहोत्सवः अमेरिकादेशे एतस्मिन् काले वस्तुतः प्राचलत् किम् ? भारते अपि ईदृशकार्यक्रमस्य आयोजनं बृहत्कार्यम् एव । भारतात् १७५ पण्डितानाम् आगमनं कथम् आयोजितम् अभवत् ?” इति । यथा देवी इच्छति तथैव भवति । गुरूणाम् आशीर्वादैः असम्भवमपि संभाव्यते । श्रीशारदापरमेश्वरी महाराज्ञी इव वज्ररत्नमुकुटं धृत्वा, स्वर्णरथे उपविश्य, १७५ पण्डितैः सह, शोभमानदेवालयम् अलङ्करोति स्म । अस्माकं सौभाग्यं यत् सा अमेरिकादेशस्य देवालये सज्जनेभ्यः ब्रह्मविद्यां दातुम् उपस्थिता अस्ति ।

या विद्यादायिनी देवी ऋष्यशृङ्गपुरवासिनी  
करुणामयी श्रीमहाराज्ञी सर्वसौभाग्यदायिनी ।  
अमितप्रकाशितजननी स्वर्णरत्नसिंहासनेश्वरी  
सा पातु मां हे शर्वाणि श्रीशारदा परमेश्वरी ॥१॥

या मोक्षप्रदायिनी देवी काश्मीरपुरवासिनी  
ज्ञाननिलया श्रीमहाराज्ञी सर्वमङ्गलकारिणी ।  
सद्गतिदर्शिनी–अम्बा तु ब्रह्मविद्यासकलेश्वरी  
सा पातु मां हे मृडानि श्रीशारदा परमेश्वरी ॥२॥

या वीणाधारिणी देवी पोकोनोगिरिवासिनी  
हंसवाहिनी श्रीमहाराज्ञी–आनन्दामृतदायिनी ।  
विश्वभ्रमणकारिणी विद्यालङ्कृतजगदीश्वरी  
सा पातु मां हे भवानि श्रीशारदा परमेश्वरी ॥३॥

श्रीशारदापरमेश्वर्यै नमः ।

ज्योत्स्ना कलवार्

# भारतस्य प्रतिनिधिः विवेकानन्दः

वाग्देवीं सरस्वतीं मनसा प्रणम्य "अमेरिका-देशस्य भगिनीभ्रातरः" इत्युक्त्वा १८९३-तमे संवत्सरे सेप्टेम्बर्-मासस्य ११ दिनाङ्के भाषणम् आरब्धवान् भारतस्य सनातनहिन्दुधर्मस्य प्रतिनिधिः स्वामी विवेकानन्दः । यावत् एतत् वाक्यं तेन उक्तं तावत् झटिति तत्र विद्यमानाः द्वित्रसहस्रं जनाः सर्वे उच्चैः करताडनं कुर्वन्तः उत्थितवन्तः । यदा सर्वे निमिषद्वयानन्तरम् आसनेषु उपविष्टवन्तः तदा विवेकानन्दः भाषणम् अनुवर्तितवान् । अतीव पुरातनस्य हिन्दुधर्मस्य विविधानि मतानि समीकृत्य तस्य सारांशं श्रीमद्भगवद्गीतायाः "ये यथा मां प्रपद्यन्ते तान् तथैव भजाम्यहम्" इत्यस्य श्लोकस्य रूपेण प्रदर्शितवान् । एतद् अनुसृत्य "प्रपञ्चे विविधेषु धर्मेषु मतेषु च कलहः मा भवेत् । अस्याः सभायाः उद्देशः तदेव भवतु" इत्युक्त्वा समापितवान् । parliament of religions मध्ये दत्तेन एतेन व्याख्यानेन विवेकानन्दः बहु-प्रसिद्धिं प्राप्तवान् । तदनन्तरं सः तस्मिन् सम्मेलने पञ्चषानि भाषणानि दत्तवान् । तस्य भाषणेषु जनानां महती प्रीतिः आसीत् । विवेकानन्दस्य भाषणं श्रोतुम् उत्सुकाः भागिनः आदिनं सम्मेलने उपविशेयुः इति मन्यमानाः सभाधिकारिणः विवेकानन्दस्य व्याख्यानं दिनान्ते आयोजयन्ति स्म । दिनान्ते अपि यदा सः उपन्यासं ददाति स्म तदा प्रकोष्ठः पूरितः भवति स्म । न केवलं धर्मसम्मेलने अपि तु बहिरपि वार्तापत्रिकासु तस्य प्रसिद्धिः प्रवृद्धा । सर्वत्र "भारतस्य हिन्दुसन्न्यासी" इति नाम्ना भित्तिपत्राणि दृश्यन्ते स्म ।




चित्रम् – www.vedantaberkeley.org

मे-मासे एव सः भारतात् निर्गत्य अमेरिकादेशं प्राप्तवान् । अतीव सुन्दरं तं देशं दृष्ट्वा विवेकानन्दः मुग्धः अभवत् । आकाशं स्पृशन्ति उन्नतानि भवनानि आश्चर्येण पश्यन् मनुष्याणां शक्तिं श्लाघते स्म । विज्ञानस्य उपयोगेन जीवने कियत् सौख्यं भवति इति तेन अवगतम् । चिकागो-नगरं प्राप्य सः ज्ञातवान् यत् धर्मसम्मेलनं सेप्टेम्बेर्-पर्यन्तं न आरभ्यते । सः तु सन्न्यासी । आध्यात्मिकविषयेषु यावत् ज्ञानं तावत् संसारव्यवहारे नैव खलु ! सेप्टेम्बेर्-पर्यन्तं कुत्र निवसेत्? तथा च चिकागो-नगरे व्ययः अधिकः । तत्र जीवनं कठिनमेव । स्वस्यधर्माधिपतेः परिचयपत्रेण विना सम्मेलने प्रवेशः नास्ति इति अपि तेन ज्ञातम् । हिन्दुधर्मस्य तु एकः धर्माधिपतिः न वर्तते । परिचयपत्रं कुतः प्राप्स्यते? अतः सर्वं भगवते समर्प्य चिकागो-नगरात् बोस्टन्-नगरं गतवान् । तत्र हार्वर्ड्-विश्वविद्यालयस्य कैश्चन प्राध्यापकैः सह तस्य संपर्कः अभवत् । तेषु प्रोफ़ेसर् जान् रैट् इति महोदयेन सह विवेकानन्दस्य स्नेहः प्रवृद्धः । तस्य महती इच्छा आसीत् विवेकानन्दः धर्मसम्मेलनं गच्छतु इति । "किन्तु मम समीपे परिचयपत्रं नास्ति" इति निवेदितवान् विवेकानन्दः । तदा जान् रैट् महोदयः अवदत् "हे स्वामिन् ! भवतः परिचयः आवश्यकः चेत् सूर्यस्य ज्वालनाधिकारः कुतः इति प्रक्ष्यते इव" इति । तदनन्तरं विवेकनन्दाय परिचयपत्रमपि दत्तवान् । तस्मिन् लिखितं आसीत् – "एषः अस्माकम् अमेरिकादेशस्य सर्वेभ्यः विद्वद्भ्योऽपि उत्तमः विद्वान् अस्ति" । एतत् नीत्वा विवेकानन्दः चिकागो पुनः गतवान् । तत्राऽपि तस्य विचित्रवस्त्रधारणकारणेन अनेकान् अपमानान् अनुभूतवान् । एवं कष्टानि सोढ्वा कथमपि parliament of religions प्राप्तवान् । अद्य अज्ञातः भिक्षुकः श्वः जगत्प्रसिद्धः स्वामी !

सम्मेलनानन्तरम् अमेरिकासमाजे ख्यातिः प्राप्ता । न केवलं विवेकानन्देन अपि तु यावत्भारतदेशेन भारतीयधर्मेण संस्कृत्या च । पार्लिमेन्ट् ओफ़् रिलिजियन्स् द्वारा भारतस्य प्राचीनसंस्कृतेः आधुनिकपश्चिमस्य वैज्ञानिकसंस्कृत्या सह मेलनं संभवम् आसीत् । यस्मिन् काले विज्ञानप्रभावात् धर्मस्य आध्यात्मिकस्य च ग्लानिः वर्तते स्म तदा विवेकानन्दस्य विदेशप्रवासेन अन्धविश्वासरहितायाः पवित्राध्यात्मिकतायाः पुनरुज्जीवनं सार्थकम् अभवत् । तस्य प्रभावः इदानीमपि स्पष्टं दृश्यते । लोककल्याणार्थं यावत् आवश्यकता विज्ञानस्य तावत् धर्मस्य अपि इति विवेकानन्देन दर्शितम् । पाश्चात्यसमाजः विवेकानन्दम् आश्चर्येण पश्यति स्म । तदानीन्तन भारतस्य अधोगतिः एव लोकेन दृष्टा । भारतदेशः आङ्लदेशस्य दासदेशः अपि । तादृशे देशे उपयोगकरं किं वा लभ्येत? विवेकानन्दस्य आविर्भावेन अन्यदेशानां भारतं प्रति दृष्टिकोणे परिवर्तनं जातम् । अनेके तत्त्वज्ञाः समाजसेवकाः वैज्ञानिकाः इत्यादयः विवेकानन्दस्य मित्राणि अभवन् ।

सर्ववेदान्तस्य चतुर्विधान् पुरातनान् योगान् लोकाय पाठितवान् विवेकानन्दः । भगवद्गीतायां भगवता बोधितः कर्मयोगः सर्वोपनिषत्सु ऋषिमुनिभिः कथितः ज्ञानयोगः पतञ्जलिमहर्षिणा दर्शितः राजयोगः नारदमुनिना प्रोक्तः भक्तियोगः च विवेकानन्देन आधुनिकभाषया उपदिष्टाः । अमेरिकादेशे आङ्ग्लदेशे युरोपखण्डे च पर्यटनं कुर्वन् प्राचीनं धर्मं जगते पाठितवान् आचार्यः विवेकानन्दः । केषाञ्चन शिष्याणाम् अपि सः आध्यात्मिकशिक्षणं कृतवान् ।

किन्तु तस्य हृदयं तु भारतस्य दीनस्थितेः विषये एव मग्नम् । अत्र अमेरिका देशे धनस्य जलवत् व्ययः तत्र भारते विस्तीर्णं दारिद्र्यम् । यद्यपि राजभवनमिव गृहे अतिथिरूपेण निवसति स्म तथापि स्वदेशस्य परिस्थितिं चिन्तयन् अश्रूणि स्रावयन् शय्यां त्यक्त्वा भूतले एव निद्राति स्म । यत् किञ्चिदपि धनं तेन लब्धं तत् सर्वं भारतस्य अभिवृद्ध्यर्थं व्ययीकरोति स्म । सः इच्छति स्म यत् पाश्चात्यविज्ञानसामर्थ्येन भारतस्य

अभिवृद्धिः भवेत् अपि च भारतस्य आध्यात्मिकज्ञानेन अन्यदेशानां कल्याणं भवतु इति । एवं परस्परसाहाय्येन लोककल्याणं भवतु इति ।

चतुर्णां वर्षाणाम् अनन्तरं तस्य मनः भारतं प्रत्यागन्तुम् उत्सुकम् अभवत् । १८९७-तमे संवत्सरे सः आङ्ग्लदेशात् भारतं प्रति यात्रा नौकायानेन आरब्धवान् । निर्गमनात् पूर्वम् एकः सज्जनः विवेकानन्दम् अपृच्छत् "स्वामिन्, एतावन्तं कालं वैभवपूर्णेषु पश्चिमदेशेषु वासं कृत्वा इदानीं पुनः धनरहितभारतं प्रति भवतः कीदृशः विचारः?" इति । विवेकानन्दः अवदत् "अत्र आगमनात् पूर्वं भारते मम प्रीतिः आसीत् । किन्तु इदानीं मम कृते भारतं पुण्यभूमिः अस्ति परमपवित्रतीर्थस्थलम् इव अस्ति च । तस्य प्रत्येकः अणुः अपि मम कृते पवित्रतमः" इति ।

भारते विवेकानन्दस्य प्रभावः कथम् आसीत् इति अग्रे पश्यामः ।

हरि चन्दन् मन्त्रिप्रगड

---

# श्रीपद्मावतीरमणामृतम्

भारतदेशस्य भक्तिसम्प्रदायः अति प्राचीनः अस्ति । पुराणकालादारभ्य सङ्गणकयन्त्रादिभिः पूरितेऽस्मिन् कालविशेषेऽपि अयं सम्प्रदायः सर्वत्र व्याप्तः संवर्धितः च प्रवर्तते । श्रीमद्रामायणभागवतादि भक्तिरससंबोधकानि महाकाव्यानि एव अस्य संस्थितेः प्रधाननिदानानि सन्ति । एतादृशान् मूलग्रन्थाननुसृत्य परकालभक्तवर्याः भक्तिवर्धकप्रबन्धान् अनेकासु भाषासु विरचय्य अस्य सम्प्रदायस्य प्रसारणमकुर्वन् । तेषु गोदा, मीरा, भद्राचल-रामदासः, तुकारामः, पुरन्दरदासः, चैतन्यादयः सुप्रसिद्धाः सन्ति । ईदृशेषु भक्तशिरोमणिषु महाकवेः जयदेवस्य नाम वैशिष्ट्येन विराजते । जयदेवः गीतगोविन्दम् इति विख्याताम् अनुपमां पदावलीं व्यरचयत् । अस्य कवेः, अपि च तेन विरचित-गीतगोविन्दस्य विषये संक्षेपेन लिख्यते ।

जयदेवस्य जन्म द्वादशशताब्द्याम् अभवत् । तस्य पितुः नाम भोजदेवः, मातुः नाम रामादेवी इति गीतगोविन्दस्य चरमभागे स एव वदति – "श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य..." । जयदेवस्य जन्मस्थलम् ओडिसा-प्रदेशे अस्ति उत वङ्ग-प्रदेशे इति दीर्घकालपर्यन्तं चर्चाः प्राचलन् । परन्तु इदानीम् अनेकेषाम् ऐतिहासिकानां मतमस्ति यत् ओडिसा-प्रदेशे, पुरी-नगरस्य समीपे केन्दुबिल्वो नाम ग्रामे जयदेवः अजायत । अस्य कवेः जीवनस्य केचन निर्देशाः गीतगोविन्दे एव सन्ति । माधव पट्नायक् नाम षोडशशताब्दीयः लेखकः अपि जयदेवस्य चरितमलिखत् । स्वल्पवर्षीयः एव जयदेवः वेदान्तशास्त्रपारङ्गतः अभवत् । सः विशेषविद्याप्राप्त्यर्थं कूर्मपतको नाम नगरं गत्वा काव्य-सङ्गीत-नाट्यशास्त्रेषु च नैपुण्यं प्राप्तवान् । अनन्तरं तस्मिन्नेव विद्यालये सः काव्य-शास्त्राणि पाठितवान् इत्यपि तत्प्रान्तीय-शिलाभिलेखनतः जानीमः । जयदेवस्य प्रियतमा भार्या पद्मावती पुरीजगन्नाथक्षेत्रे नर्तकी आसीत् । "जयति पद्मावतीरमणजयदेवकविः..." इति तस्य पत्न्याः परिचयं स एव गीतगोविन्दे कारयति ।

"श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबन्धम् ।" इति काव्यस्य मुखबन्धे कविना सूचितमस्ति । इत्थं गीतगोविन्दकाव्यस्य प्रधानविषयाः सन्ति कृष्णेन सह गोपिकानां रतिकेलयः, केशवस्य विरहे राधिकायाः विप्रलम्भज्वरः, अपि च राधामाधवयोः सम्भोगशृङ्गारः । गीतगोविन्दे द्वादशसर्गाः, तेषु २४ गीतानि च सन्ति । एतानि गीतानि अष्टपद्यः इति विख्यातानि, यतः प्रत्येकस्मिन् गीते अष्टपदानि वर्तन्ते । काव्ये त्रीणि मुख्यपात्राणि भवन्ति – कृष्णः, राधा, राधायाः सखी च । अनेकेषां व्रजनारीणाम् अमुख्यपात्राणि अपि वर्तन्ते । काव्यस्यारम्भे श्रीकृष्णस्य गुणातिशयप्रशंसारूपेण शृङ्गाररसरहितगीते द्वे स्तः । अनयोः दशावतारगीतम् अति प्रसिद्धमस्ति । तदनन्तरं काव्यस्य मुख्यभागः प्रारभ्यते । प्रथमतया गोपिकाभिः सह विलासकुतूहलेन नृत्यतः पीताम्बरस्य



बशोली चित्रम् – www.exoticindiaart.com

विषये विरहतापेन पीडितां राधिकां सूचयति सखी ("विहरति हरिरिह सरसवसन्ते नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते") । अनन्तरमसौ सखी दामोदरस्य स्थानं गत्वा "सा विरहे तव दीना" इति राधिकायाः विरहवेदनां तस्मै निवेदयति । तच्छ्रुत्वा सोऽपि राधिकां प्रति गच्छति । परन्तु राधा विलम्बेनागतवते कृष्णाय प्रणयकोपेन कुप्यति । तदनन्तरं मदनाग्निदग्धो मुरारिरपि "प्रिये! चारुशीले! मुञ्च मयि मानमनिदानम्" इति प्रत्यनुयाचति, पटुत्वेन राधां प्रसादं करोति च । अन्ते सम्भोगनिरतयोः राधामाधवयोः आनन्दानुभवः माधुर्येण वर्णितः । इत्थं प्रेमरसार्द्रशब्दैः गीतैः च राधावल्लभस्य मनोहरत्वं विलासनिपुणतां च विवृणोति महाकविरयम् ।

परन्तु ईदृशस्य प्रणयकाव्यस्य भक्तिसम्प्रदायेन सह कः सम्बन्धः इति प्रश्नः जायेत । शास्त्रज्ञानामभिप्राये जयदेवादिभिः भक्तकविभिः वर्णितशृङ्गाररसः लौकिककामाज्जनितकन्दर्पशृङ्गारः

इति न मन्तव्यः । भक्तिशृङ्गारः इत्येतस्य नाम । अर्थात् परमात्मजीवात्मनोः आनुषङ्गिकसम्बन्धः एव नायकनायिकाभावेन भक्तानां मनसि परिणमति इति ते वदन्ति । अनया दृष्ट्या गीतगोविन्दस्य पात्राणि ईक्षामहे चेत् कृष्णः तु परमात्मा । राधिकायाः पात्रं जीवात्मनः प्रतिनिधित्वेन भवति । केशवस्य विरहे राधिकायाः विरहतापः तु भगवतः वियुक्तस्य जीवात्मनः स्थितिं प्रदर्शयति । अस्मिन् दर्शने सख्याः पात्रस्य अपि विशेषतात्पर्यः भवति । एषा सखी सर्वदा कृष्णस्य विषये राधां सूचयित्वा, राधायाः विरहवेदनां हरिं सूचयित्वा च नायकनायिकयोः घटककार्यं करोति । तस्मात् सा सखी परमात्मजीवत्मनोः घटककार्यं क्रियमाणस्य गुरोः वा ज्ञानिनः प्रतिनिधिः इति सूक्ष्मार्थं व्याख्यान्ति केचन साम्प्रदायिकाः । एतादृशः भक्तिशृङ्गाररसः श्रीमद्भागवतपुराणादारभ्य प्रयोगे अस्ति । आधुनिककवीनां कृतिषु अपि ईदृशः शृङ्गाररसः दृश्यते । उदाहरणार्थं सप्तदश–शताब्द्याम् अनेकानि शृङ्गाररसयुक्तपदानि विरचितवतः क्षेत्रय्यस्य विषये विश्ववाण्यामेव एकं लेखनमासीत् ।

भारतदेशे गीतगोविन्दस्य व्याप्तिः, प्रबलता च अभ्यधिके स्तः । रचनानन्तरं स्वल्पकाले एव अस्य काव्यस्य कीर्तिः अन्येषु प्रदेशेषु अपि आतनोत् । उदाहरणार्थं द्वादशशताब्द्याम् एव पृथ्विराज–चौहान–नाम्नः राजस्थाननृपस्य राजकविः गीतगोविन्दस्य प्रस्तावं करोति । गुजरात–प्रदेशे अपि एकस्मिन् मन्दिरे जयदेवस्य विषये त्रयोदश–शताब्दीयं शिलाभिलेखनं दृश्यते । जगत्प्रसिद्धे पुरीजगन्नाथक्षेत्रे जयदेवस्य समकालादारभ्य अद्यापि गीतगोविन्दस्य गीतानि अभिनीतानि सन्ति । ओडिसी, मणिपुरी, कथकली, भरतनाट्यम् इत्यादिषु नाट्यपद्धतिषु अभिनयार्थं गीतगोविन्दस्य गीतानि बहुशः उपयुज्यन्ते । गीतगोविन्दकाव्यं काश्मीरप्रदेशे बशोली नाम चित्रलेखनशैलीं प्रैरयत् । कर्णाटकसङ्गीत–कार्यक्रमेषु अष्टपदीनां प्रामुख्यता, प्रसिद्धिः च भवतः । ऊत्तुक्काडु वेङ्कटकविः नाम कर्णाटकसङ्गीतपद्धतेः प्रसिद्धवाग्गेयकारः अष्टादशशताब्द्यां जीवति स्म । सः एकस्यां प्रसिद्धकृतौ जयदेवस्य कीर्तिं गायति इत्थं – (पूर्वीकल्याणी रागः) “पद्मावतीरमणं जयदेव–कविराज–भोजदेवसुत–पद्मपाद–स्मरणं कुरु मानस...” । अस्य कृतेः चरमपङ्क्तौ “समान–रहित–गीतगोविन्दकाव्यम्” इति गीतगोविन्दस्य अनुपमवैशिष्ट्यं प्रकटीकरोति वेङ्कटकविः । चैतन्यः, मीरा इत्यादयः परकाले जाता भक्ताः अपि गीतगोविन्देन विपश्चिताः आसन् ।

काव्यस्य मुखबन्धे जयदेवः गीतगोविन्दं पठितुमस्मान् आह्वयति –

यदि हरिस्मरणे सरसं मनः  
यदि विलासकलासु कुतूहलम् ।  
मधुरकोमलकान्तपदावलीं  
शृणु तदा जयदेवसरस्वतीम् ॥

एतदनुसृत्य सुमनसः सर्वे श्रीपद्मावतीरमणामृतमनुभूय मोदन्तामिति आकाङ्क्षामहे ।

कृष्णः जगन्नाथः

# पुस्तकपरिचयः - दृष्टिदानम्




कन्नडमूलम् – डा. दोड्डिरिवेङ्कटगिरिरावः  
संस्कृतानुवादः – जनार्दन हेगडे

कार्यालये सम्भवितात् अपघातात् आन्ध्यं प्राप्यते विकासेन । कदाचित् तस्य सुमत्या सह सम्पर्कः भवति । दयाघृणादिभावान् अप्रदर्शयन्ती सुमतिः तस्मै अरोचत । स्वस्य काचित् गतिः भवतु लोकोपवादः मास्तु इति विचिन्त्य विवाहः प्रस्तापितः विकासेन । तावति तस्मिन् अनुरक्ता सुमतिः विवाहं अङ्गीकरोति । यद्यपि विकासदृष्ट्या विवाहः तु केवलं आनुकूल्यार्थं कल्पितः सम्बन्धः सुमतिः कथं तस्य प्रीतिं प्रेम च सम्पादयति इति विषयः अस्याः कथायाः ।

ललितया शैल्या अनूदिता अस्ति कथा जनार्दनहेगडेवर्येण । कथा रमणीया इत्यतः पुस्तकं पठनीयमेव । पठनेन संस्कृतभाषाज्ञानवर्धनम् अपि भवति ।

पुस्तकं www.samskritabharati.org तः प्राप्तुम् शक्यम् ।

# सुभाषितम्

न वेत्ति यो यस्य गुणप्रकर्षं  
स तं सदा निन्दति नात्र चित्रम् ।  
यथा किराती करिकुम्भजातां  
मुक्तां परित्यज्य बिभर्ति गुञ्जाम् ॥

अन्वयः – यः यस्य गुणप्रकर्षं न वेत्ति, सः तं सदा निन्दति । अत्र चित्रं न । यथा किराती करिकुम्भजातां मुक्तां परित्यज्य गुञ्जां बिभर्ति ।

यथा व्याधपत्नी गजकुम्भस्थलस्थस्य मौक्तिकस्य मूल्यम् अजानती मौक्तिकं त्यक्त्वा गुञ्जां सञ्चयति तथैव यदि कश्चित् अन्यस्य गुणान् न जानाति तर्हि सः तं अन्यं सर्वदा तिरस्करोति इत्यत्र विचित्रं किमपि नास्ति । रत्नकारः एव रत्नस्य मूल्यं जानाति खलु ।  
गुञ्जा – सस्यविशेषः यस्य बीजम् आकर्षकं रक्तवर्णं भवति ।

# कोऽस्ति सर्वोत्तमः भारतीयः ?

२००२ तमे वर्षे आङ्ग्लदूरदर्शनसंस्था (बीबीसी) "१०० सर्वोत्तमाः आङ्ग्लेयाः" नाम कार्यक्रमं प्रसारितवती । आङ्ग्लेयानाम् इतिहासे जनाः कं सर्वोत्तमं मन्यन्ते इति निश्चयीकर्तुं निर्वर्तितस्य कस्यचित् निर्वाचनस्य परिणामः अस्मिन् कार्यक्रमे प्रसारितः अभवत् । अतीव जनप्रियस्य एतस्य कार्यक्रमस्य निर्वाचने दशलक्षाधिकाः जनाः भागम् अवहन् । एतस्मिन् जनाः अन्तर्जालेन दूरवाण्या च भागं स्वीकर्तुं शक्तवन्तः ।

अन्ते द्वितीयविश्वयुद्धसमये देशस्य प्रधानमन्त्री विन्स्टन्–चर्चिल्–महोदयः सर्वोत्तमः आङ्ग्लेयः इति प्रतिजातः । द्वितीयं स्थानं यन्त्रज्ञः इसम्बार्ड् ब्रूनेल्, तृतीयं स्थानं राजकुमारी डयना च प्राप्नुताम् । न्यूटन् शेक्स्पियर् आदीनां महाङ्ग्लेयानाम् अपेक्षया राजकुमार्याः डयानायाः विवरणं बह्वीः भ्रुवः वक्र्यकरोत् । जनप्रियाः एव उत्तमाः सञ्जाताः इति बहूनाम् अभिप्रायः ।

२००५ तमे वर्षे अमेरिकादेशेऽपि एतादृशः कार्यक्रमः एकः प्रसारितः अभवत् । तत्रापि लिङ्कन् वाशिङ्गटन् आदीनाम् अपेक्षया यदा रानल्ड्–रेगन् महोदयः सर्वश्रेष्ठः अमेरिकीयः उद्घोषितः तदापि महान् विवादः महती चर्चा च अश्रूयेताम् । कतिपयेभ्यः मासेभ्यः पूर्वम् आल्झैमर्–व्याधिग्रस्तस्य रेगन्–वर्यस्य मरणात् जनानां मनसि यत् कार्पण्यं सञ्जातम् आसीत् तस्मात् एव सः लिङ्कन्वर्यस्य अपेक्षया सङ्कीर्णरूपेण विजयं प्राप्नोत् इति केचन चिन्तयन्ति ।

तदनन्तरं यदा केनडा फ्रान्स् जर्मनी इत्यादिषु देशेषु एतादृशः कार्यक्रमः प्रचालितः तदापि जनसमूहतः पूर्वानुगुणप्रतिक्रिया उपलब्धा ।

एतस्मात् वयं जानीमः यत् कः सर्वश्रेष्ठः इति विषयस्य स्थिरम् उत्तरं बहुशः किमपि नास्ति । किन्तु एतस्मात् प्रश्नात् यः विमर्शः जनितः सः बोधकः मनोरञ्जकः चापि । अस्य लेखनस्य पठितारः प्रायः कः सर्वश्रेष्ठः भारतीयः इति विषये अधिकाम् उत्सुकतां प्रदर्शयिष्यन्ति ।

सर्वेभ्यः देशेभ्यः भारतस्य इतिहासः अद्वितीयः अपूर्वश्च, यः पञ्चसहस्रवर्षेभ्यः विना अन्तरायम् अनुवर्तते । अस्मिन् सुदीर्घे काले भारतमाता महतः राज्ञः विदुषः ऋषीन् तेजस्विनः तत्त्वज्ञान् बहून् प्रसूतवती । परम् अशोकः हर्षः अक्बर् इत्यादिषु राजसु वाल्मीकिः व्यासः कालिदासः जयदेवः ठाकुरः इत्यादिषु कविषु पिङ्गलः पाणिनिः आर्यभटः भास्करः चरकः सुश्रुतः इत्यादिषु वैज्ञानिकेषु कपिलः पतञ्जलिः बुद्धः महावीरः नानकः गान्धिः इत्यादिषु तत्त्वज्ञेषु कं सर्वश्रेष्ठं मत्वा वृणुयाम ? चिन्तयामि यत् अस्माकं वरणं भारतस्य आत्मतत्त्वं प्रदर्शयेत् यत् तस्य वेदेषु उपनिषत्सु च उल्लिखितम् अस्ति । अपि च वृणुयाम तं यः प्रधानरूपेण तस्य सहदेशवासिनां जीवनेषु प्रगाढं सुपरिवर्तनम् उत्पादितवान् । एतौ अंशौ मनसि निधाय जगद्गुरुम् आदिशङ्कराचार्यं 'सर्वोत्तमः भारतीयः' इति पदव्या सत्करोमि ।

यदा सः ७८८ तमे वर्षे अजायत तदा भारतस्य महती वैदिकपरम्परा ग्लानस्थितौ आसीत् । भारतस्य सनातनधर्मः यः तस्याः परम्परायाः मूलम् आसीत् सः अन्ततः विविधासु शाखासु भिन्नः भूत्वा तासां परस्परकलहात् दुर्बलः जातः । बहिर्भागतः बौद्धजैनमतयोः समाह्वानं सम्मुखीकृत्य चापि सः क्षीणः जातः ।



चित्रम् – www.chinmaya-sanjose.org

अल्पे एव वयसि समस्तशास्त्रपारङ्गतः शङ्करः परिव्राजकरूपेण देशाटनं कृत्वा तस्य अद्वैतसिद्धान्तं जनान् अबोधयत् । ब्रह्मसत्यं जगन्मिथ्यं जीवः ब्रह्म नापरः इति तत्त्वम् अध्यापयन् देशस्य इतरतत्त्वज्ञान् वितर्कविवादे पराजितवान् । तस्य विजयः आसीत् जनमनहृदयसङ्ग्रामे । उपनिषदां सारः अद्वैतः एव इति प्रमाणीकुर्वन् सः भारतस्य षड्दर्शनेषु वेदान्तस्य प्राधान्यं प्रतिष्ठापितवान् । सः अद्वैतस्य प्रचारणाय भारतस्य चतसृषु दिक्षु चतुरः मठान् अनुष्ठापितवान् । द्वात्रिंशद्वर्षीयस्य तस्य अकालमरणानन्तरं ते तस्य जीवनकार्यं निर्वहन् अद्यावधि वर्तन्ते ।

तस्य प्रभावतः अद्य समग्रभारततत्त्वदर्शनः वेदान्तश्च उभावपि परस्परपर्यायवाचकौ शब्दौ सञ्जातौ । केचन इतिहासज्ञाः मन्यन्ते यत् ऋते शङ्करस्य उपस्थितेः भारतस्य आध्यात्मिकपरम्परा बौद्धीयमार्गम् अनुसरिष्यत् इति ।

सः यावदुत्कृष्टः तत्त्वज्ञः तावदेव अद्भुतः कविरपि आसीत् । सामान्यानां जनानां भक्तिभावनां जनयितुं सः अनेकानि स्तोत्राणि गीतानि च रचितवान् । एषु आनन्दलहरी शिवानन्दलहरी सौन्दर्यलहरी इत्यादीनि काव्यानि जगतः रमणीयतमासु काव्यरचनासु परिगण्यन्ते ।

एवमहं एतं मलयजं महत्कवितत्त्वविदं भारतस्य वरिष्ठं मन्ये । किन्तु एषः तु मम अभिप्रायः एव । वदन्तु भवतम् अभिप्राये कोऽस्ति सर्वोत्तमः भारतीयः ?

राज् कोठारु

# भारत-अमेरिकयोः परमाणु शक्तिसम्मतिः

अनतिदूरे काले भारत–अमेरिकादेशयोः परमाणुशक्तिसम्मतेः कार्याभिवृद्धिः सञ्जाता । अस्याः सम्मतेः प्रगतिः बहुभ्यः वर्षेभ्यः वर्धमाना प्रस्तुतस्थितौ प्रायः निश्चितसत्रे वर्तते । कार्यमिदं कथं प्राचलत्, अस्य कर्तारः के, के च प्रशंसार्हाः इति श्रोतव्यः ज्ञातव्यः विषयः । अस्मिन् लेखने सम्मतेः स्थूलपरिचयकल्पनस्य प्रयत्नः क्रियते ।

## दीर्घकालपर्यन्तम्

प्रायः त्रिंशत्वर्षात् पूर्वं भारते इन्दिरागान्धीशासनेन प्रथमपरमाणुपरीक्षा कृता शान्त्यात्मकेन अभिधानेन । किम् अन्ये हिंसात्मक–परीक्षां कुर्वन्ति इति मा प्राक्षीः ! अग्रिमपरीक्षाः तु वाजपेयीशासनेन पञ्चषेभ्यः संवत्सरेभ्यः पूर्वं कृताः । ताभिः परीक्षाभिः भारतीय–वैज्ञानिकाः स्वकार्यसिद्धतायाः कृतसमीक्षणाः तान्त्रिकं वैज्ञानिकं च औन्नत्यं प्राप्नुवन् । तथा विश्वस्य निन्दां श्रृण्वन् भारतः अनुबन्धान् (sanctions) अन्वभूत् । परमाणुपरीक्षया विश्वस्य हानिरेव जायते, इतोऽपि अधिकं शस्त्रस्पर्धा एव फलम् एवमादि बहुविधाः निन्दाः क्षिप्ताः अन्यैः राष्ट्रैः । भारतसर्वकारः राष्ट्रान् परिदेवयन्, स्वक्लेशान् निवेदयन्, भारतीयपरिस्थितेः अवगमनं याचमानः यथाशक्ति अग्रिमविचारस्य उपस्थापनम् अकरोत् । न केवलं सर्वकारः संभाषणे रतः, परन्तु बहवः सामन्यभारतीयाः अपि विवक्षां प्रकटयन्ति स्म । तदा एकस्यां निशायाम् एव अनेके विदुराः जाताः इव आसीत् । परीक्षया कुपिताः अन्ये राष्ट्राः भारतस्य विवरणेन न तु सन्तुष्टाः । तथापि भारतेन प्रारम्भः कृतः । अपि च एतत् कार्यं केवलं वाजपेयीशासनेन सञ्चालितः इति न । तस्मात् पूर्वमपि अन्यानि नारसिंहरायादीनि शासनानि एतादृशकार्येषु शनैः शनैः कार्यप्रगतिं साधितवन्तः । साफल्यात् वञ्चिताः अपि नष्टचेतस्काः नाभवन् । किन्तु क्षमया दीर्घकालं यावत् अन्यान् राष्ट्रान् भारतीयदृष्ट्यभिमुखं कर्तुम् अगतोत्साहानि भारतीयशासनानि यतन्ते स्म ।

## नैरन्तर्यम्

अथ अन्यैः राष्ट्रैः अनुबन्धिते भारते सचिव–जस्वन्त्–सिंहस्य अधिकारी–स्ट्रोब्–टाल्बट्–महोदयस्य च संभाषणानि आरब्धानि । सचिवस्य प्रमुखचर्चाविषयाः आसन् भारतस्य परमाणुपरीक्षाकारणानां स्पष्टीकरणं च परमाणुयोजनावबोधनं च । क्रमशः तयोः चर्चाः अभ्यवर्धन्त । ताभिः चर्चाभिः स्ट्रोब्–टाल्बट्–महोदये भारतस्य परिस्थितेः अवधारणं सञ्जातं भारतस्यैव दृष्ट्या । एतस्य कल्पनम् अत्यावश्यकाय अभूत् यतः तस्मात् कालात् पूर्वं नैरन्तर्येण भारत–अमेरिकयोः परमाणुशक्तेः संभाषणं नासीत् । टाल्बट्महाभागः गच्छति काले एताः चर्चाः आधारीकृत्य पुस्तकमलिखत् ।

तादृशचर्चा वर्तमाने मनमोहनसिंहशासनेन अग्रे नीता । मनमोहनमहाभाग–बुष्महोदययोः दृष्टिसाधर्म्ये जाते अनयोः देशयोः परमाणुशक्तिसम्मतिः भवितुम् अर्हतीति सिद्धम् । भारतः उपत्रिंशत्संवत्सरानन्तरं परमाणुशक्त्यनुबन्धात् विमुक्तः भवेत्, अन्यैः राष्ट्रैः अनुमोदितशक्तिः स्यात् इति निश्चितमनाः बुष्महोदयः स्वशासनाय तस्योद्देशस्य साधनाय अध्वानं दर्शयित्वा भारत–अमेरिकयोः संबन्धस्य प्रगतिम् अकल्पयत् । अपि च सम्मतिरियं विश्वस्य अन्यैः देशैः सहापि भारतस्य नवसंबन्धस्य उद्घाटनं दीपज्योतिरिव अकरोत् । यद्यपि सम्मतिः पूर्णतया एतावत् पर्यन्तं (अस्य लेखनस्य समये) न फलितं तथापि या प्रगतिः कृता सा श्लाघनीया । अस्मात् स्थानात् सम्मतिसिद्धिः भवत्येव इति श्रुतवाक् ।

## सत्कृतिः

अनया परमाणुशक्तिसम्मत्या साध्याः अनेके सन्ति । इतः पूर्वं भारतीयवैज्ञानिकाः इतरेषां साहाय्यं विना संशोधनं कुर्वन्तः तान्त्रिकाभिवृद्धिं साधयन्तः स्वकल्पितशक्तिं प्रदर्शितवन्तः एव । विश्वसाहाय्यं विना प्रगतिः शक्यापि, मन्दं भवेत् । अपि च विदितविषयाणां पुनर्वीक्षणं भवति ।

सम्मतेः साफल्यात् भारतीयवैज्ञानिकाः इतरवैज्ञानिकैः संभाषन्ते । परस्परविचारविनिमयं कुर्वते । वर्षाकाले यथा घनमेघेषु त्यक्ततोयेषु अन्तर्भूतेषु सूर्यकिरणानि भुविं स्पृष्ट्वा नवजीवनं कल्पयन्ति तथा सिद्धौ सम्मतिसाफल्ये नष्टानुबन्धाः भारतीयवैज्ञानिकाः पुनरुदितचेतस्काः विश्वासवर्धके प्रशंसनीये कार्ये निमग्नाः भवन्ति । ततः वैज्ञानिकी तान्त्रिकी च अभिवृद्धी सञ्जायेते । तदभिवृद्धेः परिणामः भारतस्य कीर्तिपताका इव राजते । विज्ञानिनः विश्वमञ्चे पात्रत्वं लब्ध्वा ह्रीं विना प्रगतिं प्रदर्शयेयुः ।

## दार्ढ्यम्

अद्य विद्यमानायां सम्मत्यां मुख्यांशाः एवं सन्ति । भारतः चतुर्दश परमाणूत्पादककेन्द्राणि अन्ताराष्ट्रियगणस्य परीक्षायै व्यवस्थाप्य परमाण्विन्धनम् उपगन्तुम् अर्हति । एतानि केन्द्राणि विहाय अन्यानि कानिचन केन्द्राणि यथापूर्वं संशोधनायैव । तत्र इतरेषां वीक्षणं न भविष्यति । सर्वेषु केन्द्रेषु स्वेच्छया एव भवितव्यमिति चेत्, इतरेषां देशानाम् अङ्गीकारः न भवत्येव । किञ्चित् प्राप्तुं किञ्चित् दातव्यमिति । सन्धिधर्मः सः । तथापि मूलभूतविषयेषु पुनरुक्तिर्न भविष्यति । तेषु मूलांशेषु वज्रादपि कठोराणीव वर्तन्ते ।

आहुः वामपङ्क्यः न इति । गतकालेन बद्धशृङ्खलाः ते अमेरिकया कमपि संबन्धं नेच्छन्ति । तेषां मनसि संबन्धराहित्यम् एव दार्ढ्याय । तदसत् । कालाय तस्मै नमः इति गणयन्तः कालमहावाते कुशरा इव आनताः दृढमूलाः जीवन्तः जयन्ते । तरवः स्तम्भाः इव महावातम् अतितर्तुम् असमर्थाः भिन्दन्तः म्रियन्ते । अतः अमेरिकायाः उपस्थितिं दृष्ट्वा सम्मतिम् अदृष्ट्वा विरोधकाराः हानिकारकाः एव । तन्न एतेषां

दार्ढ्यम् । परं स्तब्धत्वम् । हन्त हन्तेति वदामि ।

वामपङ्क्तीनां विरोधम् अतिक्रम्य अन्यदेशानां प्रश्नानां समाधानं कृत्वा भारतीयसर्वकारः सम्मतेः अङ्गीकाराय कार्यकरणाय च महता प्रयतते । तथा अस्मिन् अभ्यासे अनेकानि भारतीयशासनानि कार्यरतानि आसन् ।

उच्यते खलु अभ्यासः दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः इति ।

नरेशः कुन्तूरु

# मुद्रिकारहस्यम् - ३

पूर्वम् ...

एका शकुन्तलानाम्नी महाराजदुष्यन्तस्य राजसभायामागत्य राजानमुक्तवती – भवान् मम पतिः, तस्मान्मां भार्यामङ्गीकुरु । राजा दुष्यन्तः तामपाजानीत । शकुन्तला गुप्तचरशिखामणेर्घुण्डीराजस्य साहाय्यमयाचत । सोऽपि प्रस्तावमङ्गीकृतवान् । स सेवकं चतुराक्षमाहूयाब्रवीत् – राजभवनाद्यथाकथञ्चिदपि ज्ञानं कुरु यदि कतिपयदिवसपूर्वं राजा कण्वाश्रमं गत आसीन्न वेति । तेन ज्ञातं – त्रिचतुर्मासपूर्वं राजा कण्वाश्रमं गतवनासीत् । घुण्डीराजः सूक्ष्मान्वेषणदृष्ट्या कण्वाश्रमं गतः । तत्र प्रियंवदादिभिः कन्याभिस्सह वार्तालापमकरोत् । सहसैव कण्वर्षिमागच्छन्तमालोक्य कन्यास्ततो निलीनाः ।

इदानीम् ...

कण्वमुनिर्वृद्ध आसीत्, अतिपाटविकः । वितृष्णवाचा अवोचत् – किं कुर्याम्, ममाश्रम एवंविधं किञ्चित् प्रतिवर्षमेकवारं द्विवारं घटत्येव । मया किं करणीयम् ? नागरिका विलासिनो युवान आगत्य कन्येच्छया आश्रमं परितो भ्रमन्ति । सीत्कुर्वन्ति, सीटीर्वादयन्ति । वर्तमानयुग आश्रमाणामपि शान्त्या निर्वाहो न भवति । पूर्वमेवं नासीत् । कस्यचिदपरस्य विषये किं वाच्यं, स्वयं दुष्यन्तोऽपि शकुन्तलया..., यां मेनका परित्यज्य गता मया च पालिता संवर्धिता च । पाखण्डी विश्वामित्रः, ऋषिम्मन्यो राजगृहं गत्वा महद्धनं प्राप्याप्येकां कन्यां न पालयितुं शक्नोति । किञ्चित्कालपूर्वमेवैकस्मिन् यज्ञे स मया दृष्टः । शकुन्तलाविषयं प्रकृत्य मया स उक्तः – कन्याया विवाहः करणीयः, धनं देहीति । स उक्तवान् – अहं तु तं प्रसङ्गं मनसो विस्मारितवान् ।

मयोक्तम् – भो वृद्ध, अपि न लज्जसे ऋषिः सन्नप्येवं भाषमाणः । मेनकया सहामोदविहाराय भवान्, सन्ततिं च संवर्धयितुमहम् । धूर्तोऽसि त्वम्, तपसः पाखण्डमाचरसि । स्त्रियं दृष्ट्वा कौपीनबन्धनमुन्मुक्तम् । मां पश्य, वर्षेभ्य आश्रमं प्रवर्तयामि, न कदापि एकमपि काण्डमभवत् ।

किन्तु भवानेव ज्ञापयतु श्रीघुण्डीराज, मयागन्तॄणां किं करणीयम् । दुष्यन्तः शकुन्तलां विवाह्य नगरं निवृत्तः । मयाश्रमं प्रतिनिवृत्तेन ज्ञातम् ।

एतेनाश्रमस्य निन्दा प्रवर्तते – घुण्डीराज आह ।

अरे त्यजतु । जनाः सन्ततीरुत्पाद्य अत्र त्यक्त्वा गच्छन्ति । तेषां निन्दा न प्रवर्तते, अहं ताः सन्ततीः पालयामि, मम निन्दा प्रवर्तते । विचित्रो लोकप्रसादः । अत एव मया शकुन्तलां दुष्यन्तगृहं नयन्तः शिष्या उक्ताः – यदि दुष्यन्त एनां न स्वीकरोति, तत्रैवेयं विसर्जनीया, नाश्रमममानेया । चिन्त्यतां घुण्डीराजमहोदय, अहमृषिः, अन्यान्यपि मम कर्तव्यानि सन्ति ।

अपि न सा मुद्रिका लभ्यते या दुष्यन्तेन दत्तासीत् – घुण्डीराजोऽपृच्छत् ।

अरे, अलम् मुद्रिकया । सम्मुखं स्थिता पञ्चहस्ता नारी नाभिज्ञाता, मुद्रिकां कथमभिज्ञास्यति । पुनरपि मया स्पष्टं कथनीयं यन्मुद्रिकात्र न लुप्ता, मार्गे क्वचिद्विलुप्ता । मां तु प्रतीयते – शकुन्तलां पतिगृहं नयद्भिरेतैः साधुभिः सा मुद्रिका चोरिता नगरे च विक्रीता । अद्यैव प्रातस्ते प्रतिनिवृत्ताः । अहं तान् दुष्टान् पृच्छामि – शकुन्तलां दिवसचतुष्टयपूर्वं दुष्यन्तसविधे त्यक्त्वा कुत्रैतावान् कालो यापित इति । श्यालाः न किञ्चिदप्युत्तरन्ति ।

किञ्चित्कालानन्तरं कण्वाश्रमाद्बहिरागच्छन्तं घुण्डीराजं कश्चिन्मुखबद्धं कृत्वा कृपाणं च पृष्ठे स्थाप्य उक्तवान् – तूष्णींभूय चलतु, गुप्तचरमहोदय ! किञ्चिद्दूरं नयनबद्धमेव नीत्वा स एकस्मिन् स्थाने उपवेशितः । मुखबन्धनेऽपगते तेन दृष्टं यदाश्रमकन्या हसन्त्यः परितः स्थिताः । नहीदं कथनीयं भवति यद् घुण्डीराजस्तस्मिन् दिने गन्धर्वविवाहमकृत्वा कण्वाश्रमादागन्तुं न शक्तोऽभवत् ।

कण्वाश्रमे प्रियंवदायाः प्राप्तिं विना न किञ्चिदन्यल्लब्धं घुण्डीराजेन । स्वस्थानं प्रति निवर्तमानेन घुण्डीराजेन राज्ञो रथो दूरतो दृष्टः । स चतुराक्षमाह – कथमत्र राजा, अपि स कण्वाश्रमं गच्छति ? न कण्वाश्रमम्, अपि तु सिद्धयोगिन आश्रमम् । त्रिचतुर्मासेभ्यः स तत्र प्रतिपक्षं एकवारं द्विवारं वावश्यं गच्छति ।

अत्र किञ्चिद्रहस्यमिव प्रतीयते ।

घुण्डीराजो गुप्तं रथादवतीर्याश्रमभवनमारूढः । एको योगीराज एकया सुन्दर्या सहितस्तिष्ठति स्म, अयं च नातिचिरं प्राप्तो दुष्यन्तः करौ बद्ध्वा योगिनश्चरणयोः प्रणतस्तिष्ठति स्म । योगी उवाच – श्रूयते कण्वाश्रमादेका कन्या तव साम्राज्ञीपदलिप्सया राजसभायामागतासीत् ।

सत्यं श्रूयते, किन्तु मया सर्वथा तिरस्कृता ।

बाढम्, बाढम् इत्युक्त्वा सुन्दरीमुद्दिश्य योगिनोक्तम् – तत्स्थानं तु मम मायायै सुरक्षितम् ।

दुष्यन्तः स्मितवान् । स मायामपश्यत् । घुण्डीराजोऽपि मायामपश्यत् । सा हि शकुन्तलायाः सौन्दर्यमतिशय्य विराजते स्म । घुण्डीराजेनावगतम् – यस्माद्राजा एनामधिकसुन्दरीमिच्छति, तस्मादेव शकुन्तलामपजानीते ।

नवम्यां तिथौ यावच्छक्यं धनमत्रानय । तस्यामेव रात्रौ बलिर्भविष्यति । तदन्तरं त्वं निष्कण्टकं राज्यं प्राप्स्यसि ।

यथा गुरोराज्ञा इत्युक्त्वा राजा प्रस्थितः ।

किन्तु सहसैव घुण्डीराजस्य चलनेन ध्वनिरभवत् ।

(अनुवर्तते)